# Shri Sita Kavacham

# શ્રીસીતાકવચમ્

## Document Information

Text title : siitaakavacham

File name : siitaakavachaAnanda.itx

Category : kavacha, raama, vAlmIki

Location : doc_raama

Author : Valmiki

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Description-comments : from Anandaramayana

Latest update : January 30, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2021

*sanskritdocuments.org*

# શ્રીસીતાકવચમ્

॥ શ્રીરસ્તુ ॥

॥ શ્રીમદાનન્દરામાયણાન્તર્ગતે મનોહરકાણ્ડે શ્રીસીતાકવચમ્ ॥

શ્રીરામદાસ ઉવાચ
શૃણુ શિષ્ય પ્રવક્ષ્યામિ સીતાયાઃ કવચં શુભમ્ ।
પુરા પ્રોક્તં સુતીક્ષ્ણાય પૃચ્છતે કુમ્ભજન્મના ॥ ૧॥

એકદા કુમ્ભજન્માનં સુતીક્ષ્ણઃ પ્રાહ વૈ મુનિઃ ।
રહઃ સ્થિતં ગુરુ દૃષ્ટ્વા પ્રણમ્ય ભક્તિપૂર્વકમ્ ॥ ૨॥

સુતીક્ષ્ણ ઉવાચ
ગુરોઽહં શ્રોતુમિચ્છામિ સીતાયાઃ પ્રીતિદાનિ હિ ।
યાનિ સ્તોત્રાણિ કર્માણિ તાનિ ત્વં વક્તુમર્હસિ ॥ ૩॥

અગસ્તિરુવાચ-
સમ્યક્ પૃષ્ટં ત્વયા વત્સ સાવધાનમનાઃ શ્રુણુ ।
આદૌ વક્ષ્યામ્યહં રમ્યં સીતાયાઃ કવચં શુભમ્ ॥ ૧॥

યા સીતાઽવનિસમ્ભવાઽથ મિથિલાપાલેન સંવર્ધિતા
પદ્માક્ષનૃપતેઃ સુતા નલગતા યા માતુલિઙ્ગોત્ભવા ।
યા રત્ને લયમાગતા જલનિધૌ યા વેદ વારં ગતા
લઙ્કાં સા મૃગલોચના શશિમુખી માં પાતુ રામપ્રિયા ॥ ૨॥

અથ વિનિયોગઃ -
અસ્ય શ્રીસીતાકવચમન્ત્રસ્ય અગસ્તિ ઋષિઃ । શ્રીસીતા દેવતા ।
અનુષ્ટુપ્ છન્દઃ । રામેતિ બીજમ્ । જનકજેતિ શક્તિઃ । અવનિજેતિ કીલકમ્ ।
પદ્માક્ષસુતેત્યસ્ત્રમ્ । માતુલિઙ્ગીતિ કવચમ્ । મૂલકાસુરઘાતિનીતિ મન્ત્રઃ ।
શ્રીસીતારામચન્દ્રપ્રીત્યર્થં સકલકામના સિદ્ધ્યર્થં જપે વિનિયોગઃ ॥

અથ અઙ્ગુળીન્યાસઃ -

ૐ હ્રાં સીતાયૈ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં રમાયૈ તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં જનકજાયૈ મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અવનિજાયૈ અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં પદ્માક્ષસુતાયૈ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ માતુલિઙ્ગ્યૈ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિન્યાસઃ -
ૐ હ્રાં સીતાયૈ હૃદયાય નમઃ ।
ૐ હ્રીં રમાયૈ શિરસે સ્વાહા ।
ૐ હ્રૂં જનકજાયૈ શિખાયૈ વષટ્ ।
ૐ હ્રૈં અવનિજાયૈ કવચાય હુમ્ ।
ૐ હ્રૌં પદ્માક્ષસુતાયૈ નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ માતુલિઙ્ગ્યૈ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ।
સીતાં કમલપત્રાક્ષીં વિદ્યુત્પુઞ્જસમપ્રભામ્ ।
દ્વિભુજાં સુકુમારાઙ્ગીં પીતકૌશેયવાસિનીમ્ ॥ ૧॥

સિંહાસને રામચન્દ્રવામભાગસ્થિતાં વરામ્ ।
નાનાલઙ્કારસમ્યુક્તાં કુણ્ડલદ્વયધારિણીમ્ ॥ ૨॥

ચૂડાકઙ્કણકેયૂરરશનાનૂપુરાન્વિતામ્ ।
સીમન્તે રવિચન્દ્રાભ્યાં નિટિલે તિલકેન ચ ॥ ૩॥

મયૂરાભરણેનાપિ ઘ્રાણેઽતિશોભિતાં શુભામ્ ।
હરિદ્રાં કજ્જલં દિવ્યં કુઙ્કુમં કુસુમાનિ ચ ॥ ૪॥

બિભ્રન્તીં સુરભિદ્રવ્યં સગન્ધ સ્નેહમુત્તમમ્ ।
સ્મિતાનનાં ગૌરવર્ણાં મન્દારકુસુમં કરે ॥ ૫॥

બિભ્રન્તીમપરે હસ્તે માતુલિઙ્ગમનુત્તમમ્ ।
રમ્યવાસાં ચ બિમ્બોષ્ઠીં ચન્દ્રવાહનલોચનામ્ ॥ ૬॥

કલાનાથસમાનાસ્યાં કલકણ્ઠમનોરમામ્ ।
માતુલિઙ્ગોદ્ભવાં દેવીં પદ્માક્ષદુહિતાં શુભામ્ ॥ ૭॥

મૈથિલીં રામદયિતાં દાસીભિઃ પરિવીજિતામ્ ।
એવં ધ્યાત્વા જનકજાં હેમકુમ્ભપયોધરામ્  ॥ ૮॥

સીતાયાઃ કવચં દિવ્યં પઠનીયં શુભાવહં  ॥ ૯॥

અથ કવચમ્ ।
ૐ શ્રીસીતા પૂર્વતઃ પાતુ દક્ષિણેઽવતુ જાનકી ।
પ્રતીચ્યાં પાતુ વૈદેહી પાતૂદીચ્યાં ચ મૈથિલી ॥ ૧॥

અધઃ પાતુ માતુલિઙ્ગી ઊર્ધ્વં પદ્માક્ષજાવતુ ।
મધ્યેઽવનિસુતા પાતુ સર્વતઃ પાતુ માં રમા ॥ ૨॥

સ્મિતાનના શિરઃ પાતુ પાતુ ભાલં નૃપાત્મજા ।
પદ્માઽવતુ ભ્રુવોર્મધ્યે મૃગાક્ષી નયનેઽવતુ ॥ ૩॥

કપોલે કર્ણમૂલે ચ પાતુ શ્રીરામવલ્લભા ।
નાસાગ્રં સાત્ત્વિકી પાતુ પાતુ વક્ત્રં તુ રાજસી ॥ ૪॥

તામસી પાતુ મદ્વાણીં પાતુ જિહ્વાં પતિવ્રતા ।
દન્તાન્ પાતુ મહામાયા ચિબુકં કનકપ્રભા ॥ ૫॥

પાતુ કણ્ઠં સૌમ્યરૂપા સ્કન્ધૌ પાતુ સુરાર્ચિતા ।
ભુજૌ પાતુ વરારોહા કરૌ કઙ્કણમણ્ડિતા  ॥ ૬॥

નખાન્ રક્તનખા પાતુ કુક્ષૌ પાતુ લઘૂદરા ।
વક્ષઃ પાતુ રામપત્ની પાર્શ્વે રાવણમોહિની ॥ ૭॥

પૃષ્ઠદેશે  વહ્નિગુપ્તાઽવતુ માં સર્વદૈવ હિ ।
દિવ્યપ્રદા પાતુ નાભિં કટિં રાક્ષસમોહિની ॥ ૮॥

ગુહ્યં પાતુ રત્નગુપ્તા લિઙ્ગં પાતુ હરિપ્રિયા ।
ઊરૂ રક્ષતુ રમ્ભોરૂ જાનુની પ્રિયભાષિણી ॥ ૯॥

જઙ્ઘે પાતુ સદા સુભ્રૂઃ ગુલ્ફૌ ચામરવીજિતા ।
પાદૌ લવસુતા પાતુ પાત્વઙ્ગાનિ કુશામ્બિકા ॥ ૧૦॥

પાદાઙ્ગુળીઃ સદા પાતુ મમ નૂપુરનિઃસ્વના ।
રોમાણ્યવતુ મે નિત્યં પીતકૌશેયવાસિની ॥ ૧૧॥

રાત્રૌ પાતુ કાલરૂપા દિને દાનૈકતત્પરા ।
સર્વકાલેષુ માં પાતુ મૂલકાસુરઘાતિની ॥ ૧૨॥

એવં સુતીક્ષ્ણ સીતાયાઃ કવચં તે મયેરિતમ્ ।
ઇદં પ્રાતઃ સમુત્થાય સ્નાત્વા નિત્યં પઠેત્તુ યઃ ॥ ૧૩॥

જાનકીં પૂજયિત્વા સ સર્વાન્ કામાનવાપ્નુયાત્ ।
ધનાર્થી પ્રાપ્નુયાદ્દ્રવ્યં પુત્રાર્થી પુત્રમાપ્નુયાત્ ॥ ૧૪॥

સ્ત્રીકામાર્થી શુભાં નારીં સુખાર્થિ સૌખ્યમાપ્નુયાત્ ।
અષ્ટવારં જપનીયં સીતાયાઃ કવચં સદા ॥ ૧૫॥

અષ્ટભ્યો વિપ્રવર્યેભ્યો  નરઃ પ્રીત્યાર્પયેત્ સદા ।
ફલપુષ્પાદિકાદીનિ યાનિ યાનિ પૃથક્ પૃથક્ ॥ ૧૬॥

સીતાયાઃ કવચં ચેદં પુણ્યં પાતકનાશનમ્ ।
યે પઠન્તિ નરા ભક્ત્યા તે ધન્યા માનવા ભુવિ ॥ ૧૭॥

પઠન્તિ રામકવચં સીતાયાઃ કવચં વિના ।
તથા વિના લક્ષ્મણસ્ય કવચેન વૃથા સ્મૃતમ્ ॥ ૧૮॥

તસ્માત્ સદા નરૈર્જાપ્યં કવચાનાં ચતુષ્ટયમ્ ।
આદૌ તુ વાયુપુત્રસ્ય લક્ષ્મણસ્ય તતઃ પરમ્ ॥ ૧૯॥

તતઃ પઠેચ્ચ સીતાયાઃ શ્રીરામસ્ય તતઃ પરમ્ ।
એવં સદા જપનીયં કવચાનાં ચતુષ્ટયમ્ ॥ ૨૦॥

ઇતિ શ્રીશતકોટિરામાયણાન્તર્ગતે શ્રીમદાનન્દરામાયણે વાલ્મિકીયે
મનોહરકાણ્ડે ચતુર્દશસર્ગાન્તર્ગતં શ્રીસીતાકવચં સમ્પૂર્ણમ્ ॥

PSH Meaning of verses from 18 to 20
Those who recite Sriraama KavachaM without reciting SeetaakavachaM and also Lakshmana Kavacha, (recitation Of only Sriraama Kavacham) is fruitless. Therefore, all the four Kavachams should be recited by people - first Hanumat, next Lakshmana, thereafter Seetaa Kavachams should be recited and lastly SriraamaKavacham. Thus, all the four kavachams are to be recited.

Encoded by Antaratma antaratma at Safe-mail.net

Proofread by Antaratma, PSA Easwaran

*Shri Sita Kavacham*

pdf was typeset on January 30, 2021

Please send corrections to *sanskrit@cheerful.com*